भारविः, पुं, कविविशेषः। स च किरातार्ज्जुनीयनामकग्रन्थकर्त्ता। तत्पर्य्यायः। शतपुष्पः २। इति त्रिकाण्डशेषः॥ तस्य ग्रन्थस्य प्रथमश्लोकोऽयम्।

"श्रियः कुरूणामधिपस्य पालनीं
प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।
स वर्णिलिङ्गी विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः॥"

भारवृक्षः, पुं, काचीनामकगन्धद्रव्यम्। इति शब्दचन्द्रिका॥

भारहरः, पुं, (हरतीति। हृ+पचाद्यच्। भारस्य हरः।) भारवाहकः। इति शब्दरत्नावली॥

भारहारः, पुं, (भारं हरतीति। हृ+अण्।) भारवाहकः। इति शब्दरत्नावली॥

भारिः, पुं, (इभस्य अरिः। पृषोदरादित्वात् इलोपः।) सिंहः। इति हेमचन्द्रः॥

भारिकः, पुं, (भारोऽस्ति वाह्यतयास्य। "अत इनिठनौ।" ५। २। ११५। इति ठन्।) भारवाहकः। भारी इति ख्यातः। तत्पर्य्यायः। भारवाहः २। इत्यमरः। २। १०। १५॥ भारहरः ३ भारहारः ४। इति शब्दरत्नावली॥ (यथा, कथासरित्सागरे। ३७। ५६।

"तत्र चाग्रागताः केचित् तमूचुः काष्ठ-
भारिकाः॥")

भारिटः, पुं, पक्षिविशेषः। तत्पर्य्यायः। श्यामचटकः २ शेशिरः ३ कणभक्षकः ४। इति राजनिर्घण्टः॥

भारी, [न्] पुं, (भारोऽस्यास्तीति वेति। भार+इनिः।) भारवाहकः। इत्यमरटीकायां रमानाथः॥ (यथा, मनौ। २। १३८।

"चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः।
स्नातकस्य च राज्ञश्च पन्था देयो वरस्य च॥")

भारयुक्ते, त्रि॥

भारौही, स्त्री, (भारं वहतीति। वह+णिः। स्त्रियां ङीप्। ततः शसादावजादौ ऊठ्।) भारवाहिका। इति मुग्धबोधव्याकरणम्॥

भार्गवः, पुं, (भृगोरपत्यम् तद्गोत्रापत्यमिति। भृगु+अण्।) परशुरामः। शुक्राचार्य्यः। (यथा, महाभारते। १। ६६। ४५।

"तस्मिन्नियुक्ते विधिना योगक्षेमाय भार्गवे।
अन्यमुत्पादयामास पुत्रं भृगुरनिन्दितम्॥")

धन्वी। गजः। इति मेदिनी। वे, ४५॥ भारतवर्षमध्ये प्राच्यदेशान्तर्गतदेशविशेषः। यथा,—

"अङ्गोत्तराः प्रविजया भार्गवा ज्ञेयमर्द्दकाः॥"
इति मार्कण्डेयपुराणम्॥

(कुलालः। यथा, महाभारते। १। १९२। १।

"गत्वा तु तां भार्गवकर्म्मशालां
पार्थौ पृथां प्राप्य महानुभावौ॥"

"भृगुः स्वघटवृत्तिः जीविकार्थं भृगुणा व्यवहरतीति भार्गवः कुलालः।" इति तट्टीकायां नीलकण्ठः॥ मार्कण्डेयः। यथा, महाभारते। १३। २२। १५।

"इत्युक्ता ते जग्मुराशु चत्वारोऽमिततेजसः।
पृथिवीकाश्यपश्चाग्निः प्रशस्तायुश्च भार्गव॥"

शौनकः। यथा, महाभारते। १। १८। ६।

"तथेति चाब्रवीद्विष्णुर्ब्रह्मणा सह भार्गव॥"

भृगुवंशीये, त्रि॥ (यथा, महाभारते। ३। ६६। ४१।

"ब्रह्म रामस्य राजेन्द्र! भार्गवस्य च धीमतः॥")

भार्गवप्रियः, पुं, (भार्गवस्य प्रियः।) हीरकः। शुक्राधिष्ठातृदेवताकत्वात्॥

भार्गवी, स्त्री, (भार्गव+ङीप्।) पार्व्वती। (भृगोरपत्यं स्त्री। भृगु+अण्+ङीप्।) लक्ष्मीः। (अस्या भृगुसुतात्वमुक्तं यथा, विष्णुपुराणे। १। ९। १४६।

"एतत् ते कथितं ब्रह्मन्! यन्मां त्वं परि-
पृच्छसि।
क्षीराब्धौ श्रीर्यथा जाता पूर्व्वं भृगुसुता सती॥")

दूर्व्वा। इति मेदिनी। वे, ४५॥ (यथा, वैद्यकरत्नमालायाम्।

"सहस्रवीर्य्या दूर्व्वा तु मङ्गल्या भार्गवी
रुहा॥")

नीलदूर्व्वा। इति शब्दरत्नावली॥ (यथास्याः पर्य्यायः।

"नीलदूर्व्वा रुहानन्ता भार्गवी शतपर्व्विका।
शष्पं सहस्रवीर्य्या च शतवल्ली च कीर्त्तिता॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

श्वेतदूर्व्वा। इति राजनिर्घण्टः॥ (भृगुवंशीयस्त्रीमात्रे। यथा, महाभारते। १। ७३। ३३।

"कस्माच्चिरायितोऽसीति पृष्टस्तामाह भार्ग-
वीम्।
हतोऽहमिति चाचख्यौ पृष्टो ब्राह्मण-
कन्यया॥")

भार्गी, स्त्री, (भृज्+घञ्। भर्गोऽस्त्यस्या इति। "ज्योत्स्नादिभ्य उपसंख्यानम्।" ५। २। १०३। इत्यस्य वार्त्ति०। इति अण्। ततो ङीप्।) वृक्षविशेषः। वामनहाटी इति भाषा। तत्पर्य्यायः। गर्द्दभशाकी २ फञ्जी ३ अङ्गारवल्लरी ४ ब्राह्मी ५ ब्राह्मण यष्टिः ६ वान्तारिः ७ भृङ्गजा ८ पद्मा ९ यष्टिः १० भारङ्गी ११ वातारिः १२ कासजित् १३ सुरूपा १४ ब्रमरेष्टा १५ शक्रमाता १६। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कासश्वासशोफव्रणक्रिमिदाहज्वरनाशित्वञ्च। इति राजनिर्घण्टः॥ अन्यत् ब्राह्मणयष्टिकाशब्दे द्रष्टव्यम्॥

भार्द्दाजी, स्त्री, (भारद्वाजी। पृषोदरादित्वात् साधुः।) भारद्वाजी। वनकार्पासी। इति शब्दरत्नावली॥

भार्य्या, स्त्री, (भरणीया इति। भृ+"ऋहलोर्ण्यत्।" ३। १। १२४। इति ण्यत्। टाप्। यद्वा भया दीप्त्या आर्य्या।) वेदविधानेनोढ़ा। विधिपूर्व्वकविवाहिता। तत्पर्य्यायः। पत्नी २ पाणिगृहीती ३ द्वितीया ४ सहधर्म्मिणी ५ जाया ६ दाराः ७ सहधर्म्मिणी ८ धर्म्मचारिणी ९ दारः १० कलत्रम् ११ कलत्रकम् १२॥ इति शब्दरत्नावली॥ अस्याः प्रशंसा यथा,—

"सा भार्य्या या प्रियं ब्रूयात् स पुत्त्रो यस्तु
जीवति।
स जीवति गुणो यस्य धर्म्मो यस्य स जीवति॥
गुणधर्म्मविहीनो यो निष्फलं तस्य जीवनम्॥
सा भार्य्या या गृहे दक्षा सा भार्य्या या
प्रियंवदा॥
सा भार्य्या या पतिप्राणा सा भार्य्या या पति-
व्रता।
नित्यस्नाता सुगन्धा च नित्यञ्च प्रियवादिनी॥
अल्पभुक् स्वल्पभाषी च सततं मङ्गलैर्युता।
सततं धर्म्मबहुला सततञ्च पतिप्रिया॥
सततं प्रियवक्त्री च सततं ऋतुकामिनी।
पितृदेवक्रियायुक्ता सर्व्वसौभाग्यवर्द्धिनी॥
यस्येदृशी भवेद्भार्य्या देवेन्द्रो न स मानुषः॥"

अस्या दोषा यथा,—

"यस्य भार्य्या विरूपाक्षी कश्मला कलहप्रिया।
उत्तरोत्तरवादा स्यात् सा जरा न जरा जरा॥
यस्य भार्य्याश्रितान्यत्र परवेश्माभिकाङ्क्षिणी।
कुक्रिया त्यक्तलज्जा च सा जरा न जरा जरा॥"
"यस्य भार्य्या गुणज्ञा च भर्त्तारमनुगामिनी।
अल्पाल्पेन तु सन्तुष्टा सा प्रिया न प्रिया प्रिया॥
दुष्टा भार्य्या शठं मित्रं भृत्याश्चोत्तरदायकाः।
ससर्पे च गृहे वासो मृत्युरेव न संशयः।
आपत्सु मित्रं जानीयात् युद्धे शूरं वने शुचिम्।
भार्य्याञ्च विभवे क्षीणे दुर्भिक्षे च प्रियातिथिम्॥"
इति गारुड़े नीतिसारे १०८।१०९ अध्यायौ॥

(तथा च महाभारते। १। ७४। ३९—४५।

"सा भार्य्या या गृहे दक्षा सा भार्य्या या
प्रजावती।
सा भार्य्या या पतिप्राणा सा भार्य्या या
पतिव्रता॥
अर्द्धं भार्य्या मनुष्यस्य भार्य्या श्रेष्ठतमः सखा।
भार्य्यामूलं त्रिवर्गस्य भार्य्यामूलं तरिष्यतः॥
भार्य्यावन्तः क्रियावन्तः सभार्य्या गृहमेधिनः।
भार्य्यावन्तः प्रमोदन्ते भार्य्यावन्तः श्रियान्विताः॥
सखायः प्रविविक्तेषु भवन्त्येताः प्रियंवदाः
पितरो धर्म्मकार्य्येषु भवन्त्यार्त्तस्य मातरः॥
कान्तारेष्वपि विश्रामो जनस्याध्वनिकस्य वै।
यः सदारः स विश्वास्यस्तस्माद्दाराः परा गतिः॥
संसरन्तमपि प्रेतं विषमेष्वेकपातिनम्।
भार्य्यैवान्वेति भर्त्तारं सततं या पतिव्रता॥
प्रथमं संस्थिता भार्य्या पतिं प्रेत्य प्रतीक्षते।
पूर्व्वं मृतञ्च भर्त्तारं पश्चात् साध्व्यनुगच्छति॥")

वृहस्पतिरुवाच।

"यस्य नास्ति सती भार्य्या गृहेषु प्रियवादिनी।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्॥
सुशीला सुन्दरी शान्ता गता यस्य गृहोदरात्।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्॥
भावानुरक्ता वनिता हृता यस्य च शत्रुणा।